# SAMPURNANAND SANSKRIT VISHWAVIDYALAYA
# VARANASI (U.P.) - 221002




## 3.5.1

संस्था परामर्शकार्याय अथ च संस्थायाः व्यक्तेश्च मध्ये राजस्ववितरणाय कांचित् नीतिं दधाति तथा च अस्याः सङ्कायसदस्यान् परामर्शकार्यं स्वीकर्तुं प्रोत्साहयति।

---

***Institution has a policy for consultancy including revenue sharing between the institution and the individual and encourages its faculty to undertake consultancy***

---

**संस्थान के पास परामर्श के लिए एक नीति है जिसमें संस्थान और व्यक्ति के बीच राजस्व साझा करना शामिल है और अपने संकाय को परामर्श लेने के लिए प्रोत्साहित करता है**

**प्रस्तावना:**

"परामर्शप्रक्रियाः सम्भूयकारिताः" इत्येतासां नीतिसम्बन्ध दिशा निर्देशानां संस्थापनोपद्देश्यम् अस्ति यत् वर्तमान काले स्थानीये राष्ट्रीये वैश्विकस्तरे वा उपलभ्यमानानि बौद्धिक संसाधनानि परस्परमुपभुज्य पारस्परिक सहयोगेन संस्कृत्भाषायाः ज्ञानस्य वा वैश्विकख्यातिं प्राप्तये शैक्षिक नागरिकव्यावसायिकसंस्थाभिः सह परामर्शप्रक्रियाः सम्भूयकारिताः इत्येतासां नीतेः औपचारिकरूपेण क्रियान्वयनज्ञानसम्पादनम। यतो हि जगदिदं प्राचीन संस्कृत वाङ्मये सन्निहिताभ्यां ज्ञानविज्ञानाभ्यां लाभान्वितं सत् परामर्शप्रक्रिया: सम्भूयकारिताः इत्येतासां माध्यमेन सन्ततम् अभिवृद्धं भवेत् । ततः प्राप्तज्ञानानुभव विशेषज्ञता: प्राचीनतविश्वविद्यालय समाजयोरुभयोपरि कल्याणं चिन्तयेदिति।

**अभिध्येयम्** – अभिध्येयस्य तात्पर्यमस्ति यत् विश्वविद्यालयाय तथा निर्देशः कर्तव्यः यथा स: प्राचीनतमसंस्कृत ग्रन्थेषु सन्निहितस्य प्राचीनभारतीय ज्ञानस्य (यस्याश्चर्यकरावशेषाः अद्यापि भारतस्य कोणे-कोणे विकीर्णाः सन्ति, तस्य साम्प्रतिक विज्ञानप्रौद्योगिकस्योश्च सम्पर्कसेतुरिव कार्यं कर्तुं शक्नुयात्। प्राचीन कालिके संसारे भारतं ज्ञानविज्ञान प्रोद्यौगिक्यादिषु क्षेत्रेषु शीर्षस्थाने तत्रैव राराजतेस्म यथा अद्य जगति पाश्चात्य राष्ट्रानि विराजन्ते। विश्वविद्यालयः विविधज्ञानाभ्यां सम्प्रतिकाय विश्वाय द्विगुणितं लाभं दाययितुमिच्छति।

दूरगामिपरिणाम:- ध्येयपथिकेन विश्वविद्यालयेन पूर्वोक्तध्येयानामवाप्तये सम्प्रति मुख्यधारायां वर्तमानै: शैक्षिकशोधसंस्थानान्तरै: सह सम्भूयकारिता: विनिश्चित्य प्राचीन भारतीय ग्रनथावहानपूर्वकं तत्र विशुद्धं शोधकार्यं च विधाय एकस्य क्रमबद्ध्यस्य ज्ञानभण्डागारस्य निर्माणं कत्तव्यं, यस्य च लाभं क्षेत्र विषये शोधरताः विना क्लेशं सम्प्राप्य स्वशोधनकार्यं सम्बद्धावश्यकतानां परिपूर्तये अपेक्षितम् विश्वविद्यालयस्य विषयविशेषज्ञाम् पार्थक्येन व्यक्तिश: स्वेच्छामात्रेण सम्पर्कयितुं शक्नुयु:।

**परामर्श प्रक्रिया:-** परामर्श प्रक्रिया य: महत्वपूर्ण उपक्रम: य: प्राचीनतमस्य सम्पूर्णानन्द संस्कृतविश्वविद्यालयस्य कृतभूरिपरिश्रमेभ्यो विद्वद्भ्य: स्वज्ञानस्य विशेषतयाश्च सर्वकाराय सार्वजनिक संस्थाभ्य: स्वायत्तसंघटनाभ्य: सामुदायिकसमूहेभ्यश्च प्रदातुम् अवसरं ददाति। परामर्शप्रक्रिया

द्विमुखप्रवेशद्वारवत् अन्त:क्रिया प्रचलन्ति। यत्रैकस्मात् मुखात् विभिन्न घटकसंघटनभाग विभागादिभि: अंगैः संहिताय समाजाय, तदीयविविधक्षेत्रस्थै:, विशेषज्ञै:, विश्वविद्यालयात् प्राप्तायां सर्वोत्तमज्ञानानुभवप्रौद्योगिकस्यादिकं ज्ञानं संजायते। द्वितीयात् मुख्यात् अर्थात् परामर्शकरूपेण व्याख्या प्रतिनिवृत्तविदुष: (विश्वविद्यालय प्रतिनिधिभूतस्य) सम्प्राप्तान्तर्दृष्टे: अनुभवस्य सम्पर्कस्य अवलोकनेन तदीय परिवर्तिकालिकम् अध्ययनानुसन्धानादीनां परीक्षणेन च विश्वविद्यालयोऽपि स्वकीयं ज्ञानं विशेषज्ञत्वं च वास्तविकरूपेण सफलं वा विफलं वा इति अभिज्ञातुं प्रभवति। परामर्शप्रक्रियाभि: संलग्ना: विशेषज्ञा: विद्वान्स: लाभविन्ता: भवन्ति। विश्वविद्यालयस्य राजस्वेऽपि वृद्धि: जायते। अस्माकं विश्वविद्यालये ज्योतिषादि शास्त्रेषु परामर्शदात्री व्यवस्था सुचारुतया प्रचाल्यमाना वर्तते।

Registrar
Sampurnanand Sanskrit University
Varanasi